International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 64-66
© 2018 IJSR
www.anantaajournal.com
Received: 01-05-2018
Accepted: 05-06-2018

**डाँ. आशिषः जे**
Department of Jyotisha,
Rashtriya Sanskrit Vidyapeetha,
Tirupati, Andhra Pradesh, India

**Correspondence**
**डाँ. आशिषः .जे**
Department of Jyotisha,
Rashtriya Sanskrit Vidyapeetha,
Tirupati, Andhra Pradesh, India

# प्रश्नशिरोमण्यन्तर्गतकार्यसिद्धियोगः एकम् परिशीलनम्

## डाँ. आशिषः जे

### प्रस्तावना

जगति जनाः सर्वदा कार्यरताः भवन्ति। योगवासिष्ठे एवं कथितमस्ति "अकर्म निरतः सिद्धिं कथं प्राप्स्यसि [1]" इति। परन्तु ईशावास्योपनिषदि एवमुक्तमस्ति "ॐ कृतो स्मर कृतस्मर [2] " इत्युक्तमस्ति अस्य अर्थः शाङ्करभाष्ये एवमुक्तम् यत् "यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर" इति। अत एव श्रीमद्भागवद्गीतायां भगवान् पार्थाय" कुरुकर्माणि [3]" इत्यबोधयत्।

यदि एकः किमपि कार्यं प्रारम्भं करोति तर्हि तत्कार्यमसम्पूर्णतया त्यक्तुं नैव इच्छति। यदा किमपि महत्पूर्णम् अथवा कठिनकार्यस्य प्रारम्भात् पूर्वम् अवश्यं तस्य कार्यस्य शुभेन पूरयितुं वाञ्छति। अतः कार्यस्य प्रारम्भात् पूर्वमेव तस्य फलज्ञानार्थं पण्डितरुद्रमणिः प्रश्नशिरोमणिनामके ग्रन्थे केचन योगाः उक्ताः सन्ति।

पण्डितरुद्रमणेः अभिप्रायानुसारेण यदि लग्नेशकार्येशौ लग्नस्थितौ अथवा कार्यभावे स्थितौ वा एकस्मिन् द्रेष्काणे स्थितौ तर्हि कार्यसिद्धिः सम्भवेत्। एतस्मिन् विषये श्रीमन्नारायणदासः अतिविस्ताररूपेण कथितवान् यत्"यदा लग्नेशकार्येशौ कार्यभावे स्थितौ परन्तु बलहीनौ वा पापग्रहणयुक्तौ अथवा शत्रृणावीक्षितौ तर्हि अल्पमात्रे कार्यसिद्धिः भवेत् [4]" इति। अत्र कार्येशस्य विषये आचार्य पद्मप्रभुसूरीणां अभिप्रायः एवमस्ति-

> भावोऽथ कार्यरूपो यस्तदधिपलग्ननाधियौ चिन्त्यौ।
> वीक्षणयोगौ भावाधिष्ठातारौ पुनश्चिन्त्यौ॥ [5]

अर्थात् प्रश्नकाले यत्कार्यसम्बद्धप्रश्नः पृष्टः तत्कार्यस्य कारकभावाधिपलग्नाधिपौ एव विचिन्तनीयौ इति। तयोः भावयोः स्वाम्योः दृष्टियुक्ती च एवं चिन्त्यौ इति। प्रश्नकाले एतयोः सम्बन्धेनापि कार्यसिद्धिर्भवेत्। विषयमिदमाधारेण अन्ये केचन कार्यसिद्धियोगविषये उक्तवन्तः सन्ति।प्रश्नशिरिमणौ -

यदि लग्न अथवा कार्यस्य उपरि चतुर्णां शुभग्रहाणां दृष्टिस्तर्हि समग्रकार्यसिद्धिर्भवेत्। अथवा द्वित्रिशुभग्रहाणां तथैव निजनाथस्य दृष्टिश्चेत् पादोनकार्यसिद्धिर्भवेत्। तथैव कार्येशं यदि एकशुभग्रहः अथवा निजनाथेन दृष्टिस्तर्हि अर्धकार्यसिद्धिर्भवेत्। लग्नकार्येशौ यदि शुभग्रहयुक्तौ तथैव लग्नेशात् दृष्टिस्तर्हि पादोनकार्यसिद्धिर्भवेत्। अमुं विषयं सर्वे अङ्गीकुर्वन्त्येव। रावणसंहितायामपि एवमुक्तमस्ति।-

शुभवर्गे लग्नगते वा सौम्ययोगमायाते।
ब्रूयादभिमतसिद्धिं प्रष्टु स्थान्तरप्राप्तिम्॥ [6]

अर्थात् लग्ने शुभग्रहाणां वर्गः अथवा शुभग्रहाणां योगः अस्ति चेत् प्रश्नकर्तुःअभीष्टकार्यसिद्धिर्भवेत्। अस्य ग्रन्थस्य अभिप्रायानुसारेण लग्ने शुभग्रहासन्तिश्चेत् कार्यसिद्धिः सम्भाव्यते। अस्मिन् विषये वराहमिहिरात्मजः पृथुयशाः स्वषट्पञ्चशिकायां[7] तथैवआचार्यभट्टोत्पलः स्वस्य आर्यासप्ततिग्रन्थे[8] कथितवान्अस्ति। आचार्यवराहमिहिरोऽपि दैवज्ञवल्लभायां[9] तथैव श्रीपद्मप्रभुसूरिः भुवनदीपिकायाम् एवमुक्तवान् –

एकः शुभग्रहो यदि पश्यति लग्नाधिपो विलोकयति।
पादोन योगमाहुस्तदा बुधाःकार्यसिद्धयै॥ [10]

अर्थात् शुभग्रहः लग्नं पश्यति किन्तु लग्नेशः न पश्यति चेत् सपादयोगः भवति। परन्तु ताजिकनीलकण्ठनामकग्रन्थे श्री नीलकण्ठदैवज्ञः एवमवदत् यत् लग्नस्योपरि शुभग्रहाणां दृष्टिभवति चेत् अर्धकार्यसिद्धिः सम्भाव्यते। परन्तु अत्र ग्रहाणां दृष्ट्या एव पादयोगः, अर्धपादयोगः भविष्यति। अत्र लग्ने शभग्रहयुक्ते सति केचन अभिप्रायभेदाः उद्भवन्ति। अन्यदैवज्ञजनानाम् अस्मिन् विषये भिन्नभिन्नाभिप्रायाः वर्तन्ते।

प्रश्नशिरोमणिग्रन्थे अग्रे एवमथितम् यत् लग्नः तथा चन्द्रः स्थिरराशौ (वृषभ-सिंह-वृश्चिक-कुम्भ) स्थिते सति स्थिरकर्मणः सिद्धिः भवेत्। यदि चरराशौ(मेष-कर्क-तुला-मकर) स्थितश्चेत् स्थिरकर्मणः सिद्धिः तथैव द्विस्वभावराशौ (मिथुन-कन्या-धनु-मीन) स्थितश्चेत् मिश्रितफलयोगः तथैव शुभग्रहैः दृष्टश्चेत् शुभफलसिद्धिः वक्तव्यम्। अस्मिन्विषये आचार्यभट्टोत्पलः एवं कथयति –

स्थिरराशौ लग्नगते स्थानप्राप्तिं वदेन्न गमनं च।
रोगोपशमं नाशं द्रव्याणाञ्च पराभवं नात्र॥ [11]

अर्थात् प्रश्नलग्ने स्थिरराशिश्चेत् (स्थानप्राप्तिसम्भावितप्रश्ने) स्थानलाभः, (यात्राप्रश्ने) गमननिरोधः, (रोगोपशमनप्रश्ने) रोगसमाप्तिः, (नष्टपदार्थप्रश्ने) द्रव्यस्य नाशनं विना तथैव (विजय-पराजयप्रश्ने) अपजयः न प्रापणीय इति वक्तव्यम्।

प्रश्नलग्नस्योपरि चरराशिस्थितश्चेत् उक्तप्रश्नेषु पूर्वोक्तविपरीतं नाम (स्थानप्राप्ति न सम्भावना, यात्रागमनं, विनारोगनाशः, धनप्रश्ने धनलाभः, विजयसम्बन्धप्रश्ने पराजयः) सम्भवन्ति।

द्विस्वभावलग्नश्चेत् मिश्र (लाभहानिः) फलम् अर्थात् लग्नस्य पूर्वार्थे स्थिरराशिसमानः तथैव उत्तरार्थे चरराशिसमानश्चेत् फलमिति मन्तव्यम्।

परन्तु ज्योतिष-प्रश्नफलगणनावसरे विभिन्नरीत्या विचारः क्रियते। यदि लग्न, सूर्य तथा चन्द्राः चर-स्थिर-द्विस्वभावराशिगता तर्हि कार्यस्य सिद्धिः असिद्धिः इत्युच्यन्ते, अथापि तस्मिन् समये प्रश्नकर्तुः मनुषस्य किमपिकार्यविषये प्रश्नः भवेत् तत्काले मेष-कर्क इत्यादि कोऽपि चरलग्नः वर्तमानश्चेत् तथैव सर्वेषु राशिषु अर्थात् चरराशौ सूर्यः तथैव चन्द्रोऽपि चरराशौ स्थितरश्चेत् तर्हि कार्यस्य सिद्धिः

निश्चयेन करणीयः एव।[12] यदि तदा पापग्रहदृष्टिश्चेत् अशुभफलमिति मन्तव्यम्।

इदानीं कार्यसिद्धियोगस्य अन्तिमभागः उच्यते - अत्र एकः विशेषश्लोकः उक्तः वर्तते- कदाचित् एकस्मिन्नेव समये पृच्छकः प्रश्नद्वयं पृच्छति तदा कस्य कार्यस्य असिद्धिः? कस्य कार्यस्य सिद्धिः सम्भवेत् इत्यस्य विषये पण्डितरुद्रमणिः एकम् अद्भुतमार्गं दर्शितवानासीत् यत् यदि शुभलग्नेशः

बलसहितस्सन् केन्द्रगतस्तर्हि पूर्वोक्तकार्यसिद्धिम् उच्यते तथैव लग्नेशः अन्यत्र भवति चेत् तत्पूर्वोक्त कार्यस्य सिद्धिः भवेदिति मार्गः अदर्शयत्।

ग्रन्थेऽस्मिन् पण्डितरुद्रमणिः आदौ कार्यसिद्धियोगस्य विवरणमददात्। तत्पश्चात् अन्ययोगचर्चामकारी। प्रायः ते पण्डिताः अमुं कार्यसिद्धियोगं मुख्यतया अङ्गीकुर्वन्ति। यतः किमपि कर्म तत् अस्मिन् योगे एव अन्तर्भवति यथा विद्यारम्भ-विवाह-विदेशगमनम् इत्यादयः एकैककार्यरूपाण्येव।

**सन्दर्भ ग्रन्थ सूची**


1. (योगवासिष्ठः.१.१.१३)
2. (ईशावास्योपनिषद्.१७)
3. (भगवद्गीता.२.४८)
4. (प्रश्नवैष्णवः.१.३०)
5. (भुवन दीपक.५९)
6. (रावण संहिता.६.कार्यसिद्धियोगः-पृ.सं.८५३)
7. (षट्पञ्चाशिका.१.४)
8. (आर्य्यासप्ततिः.१७)
9. (दैवज्ञवल्लभा.२.२०)
10. (भुवन दीपक.६४)
11. (प्रश्नज्ञान.१५)
12. (ज्यौतिषप्रश्नफलगणना.१.१)